घ्रानचण्डीविधानपूजापद्धतिः

४७००

4700

F. = 17

॥ श्रीगणेशाय नमः ॥ श्रीनवदुर्गायै जयतु ॥ ॥ शतचंडी विधान पूजा पद्धतिः ॥

श्रीभगवती महाकाली महालक्ष्मी महासरस्वती नवदुर्गायै नमः ॥ ॥

॥ श्रीगणेशाय नमः ॥ ॥ अथ शतचंडीविधानं ॥ ॥ तत्रोपहाराः ॥ प्राचीसाधनं ॥
ततो दशहस्तस्य वा मंडपनिर्माणं कार्यं ॥ ततो रुद्रयामले उत्तरखंडे देवीचरित्रे ॥
दशाद्वादशहस्तं वा चतुर्द्वारसुशोभनं ॥ चतुरस्रं पताकाढ्यं मंडपं वेदिभूषितं ॥ षो
डशस्तंभसंयुक्तं पुष्पपल्लवशोभितं ॥ वसुकोणयुतां वेदिं मध्ये कुर्यात्त्रिभागतः ॥
पक्वेष्टकचितां रम्यामुच्छ्रायेद्धस्तसंमितां ॥ सर्वलक्षणसंपन्नां वेदिं कुर्यान्मनोहरां ॥
पंचवर्णरजोभिश्च कुर्यान्मंडलकं शुभं ॥ सर्वतोभद्रसंज्ञं च मनोहारि सुशोभनं ॥
पंचवर्णवितानं च किंकिणीजालमंडितं ॥ प्रवालैर्मौक्तिकैश्छन्नं बध्नीयाच्च वितानमु
त्तमं ॥ श्वेतपुष्पैस्तथा रक्तैः पीतैश्चापि सुसंवृतं ॥ नीलोत्पलैः कोकनदैर्भूषितं च
फलैस्तथा ॥ आम्रपल्लवमालाभिर्दूर्वाभिर्मंडपं शुभमिति ॥ ततः कुंडं पश्चिम २
तः कार्यं ॥ तदुक्तं देवीचरित्रे ॥ वारुण्यां च प्रकर्तव्यं कुंडं लक्षणलक्षितमिति ॥
तच्च कुंडं द्विहस्तमितं कार्यं ॥ तदुक्तं सप्तशतिकाकल्पे ॥ चतुरस्रे समे कुंडे

३

समंताद्धस्तमेखलके॥ एकावरणसंयुक्ते यो नित्यं मंडलमंडिते॥ दशांशवि
धिना होममुक्तद्रव्येण साधयेत्॥ नवदुर्गामखे कुंडमेवं ज्ञानी हि न्यूनतो
नित्यचंडीविधानेपि कुंडमीदृक्च शकीर्तितं॥ नवचंडीमखे कुंडमीदृग्लक्षण
मुच्यते॥ एतद्द्विगुणितं कुंडं शतचंड्याः शकीर्तितमिति॥ एकावरणसं
युक्तमिति॥ आवरणं कुंडावरणरूपत्वात्। मेखला। तेन एकमेखल
मित्यर्थः॥ एकमेखलामानं तु मध्यसूत्रं चतुर्विंशतिधा विभज्य तदंशैः
षड्भिर्द्विरंशैः स्फुटत्व विस्तारा। तावत्तुंगा चेति। तदुक्तं वाजपेय्यां॥ षडंशा
विस्तृतोन्नताथवैकैकैव मेखलेति। एतद्द्विगुणितं कुंडमिति। एकस्मा
त्पूर्वोक्तादेकहस्तकुंडात् द्विगुणितं द्विहस्तमित्यर्थः॥ दशध्वजा। दशप
ताका॥ षोडशहस्तदंडो महाध्वजः॥ स्रुकस्रुवौ पूर्णाकृत्यर्थमौदुंबरका
ष्ठनिर्मितः अनालंतः॥ कुंभ २० कोडियां ५० सूत्रशेर १ अश्वत्थोदुंबरप्लक्ष
न्यग्रोधानां पल्लवा॥ मुद्रापन २० कोफलशेर १ नालिकेर २५ पंचव

न्नि पंचरत्नांसि सर्वतो तद्भमंडलार्थं ॥ पंचवर्णको वितानः ॥ एकसुवर्णनिर्मिताष्ट
ष्टादशभुजाष्टभुजा वा देवीमूर्त्तिः ॥ तदुक्तं देवीचरित्रे ॥ मूर्त्तिं देव्याः प्रकुर्वीत सुवर्णस्य
पलेन हि ॥ तदर्द्धेन प्रकुर्याद्वा तदर्द्धेन महामते ॥ अष्टादशभुजां देवीं कुर्याद्वाष्टकराम
पि ॥ इति हीरनाथांगोसारतदुक्तं देवीचरित्रे ॥ पट्टकूलयुगाछन्नां वेदिमध्ये निधा
पयेत् ॥ पुण्याहवाचनार्थताम्रकलश १ बलिदानार्थमाषमिश्रिततंडुलशेर २ ॥ तीर्थो
दकं ॥ सर्वौषध्यः ॥ उपलोट ॥ दारुहलद ॥ कूकाहलद्द ॥ चंदन ॥ वाले ॥ वचा ॥ कचुर ॥
मुस्ता ॥ छड १ ॥ इति उपहारः ॥ कस्तूरि । कुंकुम । चंदन । कर्पूर ॥ सुवर्णरजतान्वितो
देव्या अलंकारः ॥ श्वेतपुष्पाणि ॥ अगरु । गुग्गुल ॥ ताम्रमयं दीपभाजनं ॥ घृतं मण १ ॥
नैवेद्यार्थं दधिप्यान्नशर्करान्वितपायसं ॥ दशजापका । आचार्य । ब्रह्मा । अष्टौ द्वारपालाः ॥
एवं विंशति । वरणसामग्री ॥ वस्त्रयुग्मानि । हस्तमुद्रा । कर्णमुद्रा । उपवीत । मधुपर्को २
पहाराः ॥ पालाशस्य समिद्धः ॥ २००० ॥ अर्कः पलाशखदिर । अपामार्गो पिप्पलः उदुं
बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ इति नवग्रहार्थं समिधः ॥ द्राक्षा । हर्के । पूग ॥

नारिंग। जंबीर। बीजपूर। खारेका। नालिकेर॥ दाडिमानि॥ इति क्रमाद् द्राणां
फलानि॥ दक्षिणा जापकेभ्य एकैकं सुवर्णं॥ द्वे सुवर्णे गुरवे। सोपस्कराशय्या
देवीनक्षत्राय कस्मैचित्॥ कपिला गौः॥ नीलमणिः श्वेताश्वः॥ छत्र। चामर। दा
सी। दास। अजा॥ अविः॥ अन्यान्यपि चरथमहिषीगृहभूमिप्रभृतीनि॥ कुं
कुमाक्तपुष्पवस्त्रालंकारभूषणादिदानानि॥ तदुक्तं देवीचरित्रे॥ दक्षिणां च द
द्यात् पश्चाद्धेमवस्त्रादिकां तदा। जापकेभ्यो दिशेत्स्वर्णं गुरवे द्विगुणं दिशेत्॥ श
य्यां सोपस्करां दद्याद्देवीनक्षत्रसुव्रत। कपिला गौर्नीलमणिः श्वेताश्वं छत्रचा
मरं॥ अन्यान्यपि च दानानि दासीदासमजाविकं॥ कुंकुमाक्तवस्त्राणि पुष्पा
लंकारभूषणमिति॥ ततः पंचामृतः॥ देव्या होमद्रव्याणि॥ पायसस्चरुः। गडुची॥
दूर्वा। शुक्लास्तिला॥ मण १॥ यवशेर १०॥ नानाविधानि पुष्पाणि॥ कुश। चंदन। इत्ये
वमादि तु पहारान् संभृत्य शोभने दिवसे विष्ट्यादिदोषवर्जिते कर्तृचंद्रबलोपेते
प्रातरुत्थाय दंतधावनादिकं विधाय॥ नदीं गत्वा। नद्यादौ विधिवत् स्नात्वा नाति

मात्रेंनसिसंस्थितः। दशांजलित्रिरात्मानं नवबीजेन पावयेत्॥ ऐं ह्रीं क्लीं चामुंडायै
विच्चे। इति नवबीजानि। कृत्वा मायांकिकं सर्वमुद्रकांते समाहितः। तर्पणं चंडिका
यास्तु षडंगंन्यासपूर्वकं। मायाबीजं तारपूर्वं चतुर्थ्यंतां तु चंडिकां। प्रोच्चार्य हृदयाऽ
3 दीनि षडंगानि प्रकल्पयेत्। सयथा॥ ॐ ह्रीं चंडिकायै हृदयाय नमः। हृदकोपस्पर्श
नं। ॐ ह्रीं चं॰ शिरसे स्वाहा। ॐ ह्रीं चं॰डिकायै शिखायै वषट्। ॐ ह्रीं चं॰ कवचाय हुं। ॐ ह्रीं
चं॰ नेत्रत्रयाय वौषट्॥ ॐ ह्रीं चं॰ अस्त्राय फट्॥ एवं न्यासविधिं कृत्वा ध्यात्वा महि
षमर्दिनीं। चंडिकां त्रिजगद्धात्रीं ब्रह्माद्यमरवंदितां। ततो नवात्ममंत्रांते चंडिका
तृप्यतामिति। जलांजलीनष्टशतं सुगंधिकुसुमान्वितं। अशक्तश्चेत्तदर्द्धेन
तदर्द्धार्द्धेन वा पुनः॥ सयथा॥ सयथा। मूलं चंडिकां तृप्यतां इति॥ एवं महा
त्मनां संतर्प्य। ततो यत्र स्थले शिवालये वाऽथ गृहे वा शतचंडीं चिकीर्षता। तत्र स्थले ग २
त्वा मंडपाद्यंतरतो प्राक् वा शुचौ देशे गोमयेनोपलिप्ते चतुःकोणे मंडले स्वस्तिको
पेते चंदनादिभिरर्चिते। गत्वा तत्पीठोपरि उदङ्मुखः उपविश्य॥ आसनात्कृतपा

चार्घोदकपाद्यादिकार्चनपद्धारान्दक्षिणतआसादयिष्यमाणब्राह्मणानां
स्नात्वाद्व्ययपीठेषुपंङ्क्त्यास्थापितेषुप्राङ्मुखानुपवेश्य॥ अद्यादिदेशकालौसंस्मृ
त्यप्रधानसंकल्पंकुर्यात्॥ सयथा॥ आचमनंप्राणायामः॥ त्रिस्त्रिनोमिमीतां०
संगमेमहि॥ सुमुखश्चेत्यादिश्लोकैर्गणेशनामानिसंकीर्त्य॥ अद्येत्यादिवाक्यांशे
षेषुप्रदेशेषुयथास्थानस्थितेषुसन्निवेश्यंतमुच्चार्य॥ ममसर्वकार्यनिवृत्त्यैधर्मस
र्वशत्रुक्षयायपुत्रलाभायसमस्तरोगनिवृत्त्यैसमस्तोत्पातानांचनाशाययशत
चंडिकापाठान्शास्त्रोक्तविधिनाचंडीपूजनपूर्वकंब्राह्मणद्वारयाहमाचरिष्ये॥ त
दंगत्वेनऋत्विजांवरणंमधुपर्केणार्चनंचाहंकरिष्ये॥ कुरुष्वेतिब्राह्मणाब्रूयुः॥
तदनंतरंयजमानोब्रूयात्॥ पावनाःसर्ववर्णानांब्राह्मणाब्रह्मरूपिणः। अनुगृ
ह्णंतुमामद्यशतचंड्याख्यकर्मणि। स्वस्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः॥ श्रोत्रि
याःसत्यवाचश्चदेवध्यानरताःसदा। देवानांचपितृणांचसर्वदातृप्तिकारकाः॥ वे
दाध्ययननिःपापावेदविक्रयवर्जिताः॥ ब्रह्मयज्ञपरानित्यंधर्मध्यानपरायणाः॥

अग्निहोत्ररताः सम्यक्स्मार्त्तकर्मणि तत्पराः ॥ यद्वद्वाक्यामृतसंसिक्ता वृद्धिं यां
ति नरद्रुमाः ॥ तेंगीकुर्वंतु मत्कर्मकल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्ता
मंत्रार्थस्थिरबुद्धयः ॥ यत्कृपालोकनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः ॥ स्वागतं भो
द्विजश्रेष्ठा मदनुग्रहकारकाः ॥ इदमर्घ्यमिदं पाद्यं भवद्भिः प्रतिगृह्यतां ॥ ओं प्र
तिगृह्णामह इति ब्राह्मणा ब्रूयुः ॥ अथ यजमान आसने उपविश्योदङ्मुखस्य ब्र
ह्मणः चरणक्षालनं स्वयं प्राङ्मुखः कुर्यात् ॥ ततः स्वयमुदङ्मुखः प्राङ्मुखाना
५ माचार्यादीनामृत्विजां चरणक्षालनं कुर्यात् ॥ यथा अस्मिन् शतचंडी विधान
कर्मणि ब्रह्मन् एतत्ते पाद्यं ॥ एष ते अर्घः ॥ पूजा स्वस्ति न इंद्रो० धातु ॥ पूजा पाद
प्रक्षालनं आचमनं ॥ एवं सर्वेषां ॥ ऋत्विक्चरणोदकेन आत्मानं परिवारं च
संप्रोक्ष्य ॥ स्थलांतरं गत्वोपविश्यात्मनश्चरणौ धौत्वाचम्य ॥ वेदघोषपुरःसरं ध
मंडपं प्रदक्षिणीकृत्य ॥ पश्चिमद्वारेण प्रविशेत् ॥ तदनंतरं पश्चिमवेद्यामुत्तर
वेद्यां वा उपविश्य ॥ वरुणश्राद्धं कुर्यात् ॥ आचमनं प्राणायामः ॥ स्वस्ति नो० सं

गमेमहि॥ अपवित्रः पवित्रोवा इत्यादि॥ पास्मै॰ मधु ३॥ अद्येत्यादि ब्राह्मणद्वार
याशतचंडीविधानकर्मणः प्रारंभनिमित्तं वरुणश्राद्धमहं करिष्ये॥ दक्षिणं जा
न्वालभ्य ब्रह्मावाहनं॥ आवाहयामि देवेशं ब्रह्माणं कमलोद्भवं। चतुर्वेदसमायु
क्तं सर्वसिद्धांतवेदिनं। सुगोत्रं प्रवरं विप्रं शाखावेदसमन्वितं॥ कर्मज्ञं कर्मसंपत्त्यै ब्र
ह्माणं त्वामहं वृणे। ब्रह्मजज्ञानमिति मंत्रं पठेत्॥ वृतोस्मीति विप्रो ब्रूयात्॥ ततः आचा
र्यावाहनं॥ आवाहयामि देवेशमाचार्यं यज्ञकारिणं। पुराणं न्यायमीमांसावेदशास्त्रार्थ
पारगं। गोत्रप्रवरसंयुक्तं शाखावेदसमन्वितं। कर्मसंपादनायाहमाचार्यं त्वामहं वृ
णे। बृहस्पते अति॰ इति मंत्रः जापकावाहनं॥ यथा वेदा यथा ब्रह्मा यथा यज्ञास्तथै
व मे। प्रपूज्या जापका यूयं जपयज्ञप्रसिद्धये॥ गौतमात्रिभरद्वाजवसिष्ठाद्याः समन्वि
ताः। गोत्रप्रवरसंयुक्ताः शाखावेदसमन्विताः॥ ततः सप्तशतीपाठाः शतमादौ श
ते चांते जपेन्मंत्रं नवाक्षरं॥ मध्ये सप्तशतीपाठ एवमेव ससंपुटं॥ सकामः संपुटं कु
र्यान्निःकामः संपुटं त्यजेत्॥ संपुटेन विना कामा नैव सिद्धिमवाप्नुयुः॥ संपुटेन सम

न्वितः॥ सर्वसिद्धिकरस्तस्मात्त्वामहं वृणोम्यहं॥ वृतास्मः इति ब्राह्मणा ब्रूयुः॥ द्वार
पालावाहनं। चतुर्द्वारस्थिता यूयं वेदपारायणं प्रति। कर्तुं समर्थाः स्थ तस्मादेतदर्थम
हं वृणे॥ वृतास्मः॥ मृत्युंजयमंत्रजापकावाहनं। योपमृत्युहरो रोगघ्नो मृत्युंजयम
नुः स्मृतः॥ जपकर्मविदं शांतं तदर्थं त्वामहं वृणे॥ अथ जातवेदाजापकावाहनं॥ अ
रातिचयविध्वंसो नानादुरितसंक्षयः॥ दुर्गाप्रसादाद्भवति जपार्थं त्वां वृणोम्यहं इति॥
ततः ब्रह्मणे आचार्याय ऋत्विग्भ्यश्च इदमासनं। ततः यथादत्तं चंदनं० ब्रह्मणे आचा०
अहं संप्रददे। इमानि अर्घ्यं० स्त्र॥ आचमनं। यथादास्यमानं भोजनं ब्रह्मणे० अहं सं
प्रददे। इमानि भाजनानि धारवस्त्रोपानत्कमंडलुवसनासनकर्णमुद्राहस्तमुद्रोपवीता
दीनि वस्तूनि तत्त्वं कर्यान्वितं यथोपपन्नं किंचित् द्रव्यं वा ब्रह्मणे आचार्याय० अहं संप्र ५
ददे। पुण्याहं दीर्घमायुरस्त्वित्यादीनि वरुणश्राद्धकर्मणः प्रति० हिरण्यदक्षिणां० ब्रह्म
णे० ददे॥ अस्य वरुणश्राद्धकर्मणो० गृहे वृद्धिं० स्त्र॥ आशीर्वादाः॥ अथ ब्राह्मणप्रार्थना॥
ब्राह्मणाः संत्रमे शांताः पापान्मां त्रसमाहिताः। देवानामपि दातारः पातारः सर्वदेहिनां॥

येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं। रक्षंतु सततं ते मां जपयज्ञव्यवस्थिताः॥ शतचंडी
जपार्थं मे संतु ते नियमान्विताः॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। चंडीध्यान
परा नित्यं प्रसन्नमनसः सदा। मौनव्रतेन भाषिणः संतु मा संतु परनिंदकाः॥ ममापि निय
मा विप्रा भवंतु भवतामपि॥ अथ ब्राह्मणा ऊचुः॥ वयं नियमसंयुक्तास्तव कर्त्तव्यतत्पराः॥
कार्यं तव करिष्यामो विधिपूर्वं न संशयः॥ कर्त्तव्या नास्ति क्रियाशंका वेदाज्ञा हि गरीयसि।
वैदिका न हि वेदाज्ञां लंघयंति कदाचन। त्वदर्थीयं त्वया कार्यं निःशंकं श्रद्धयान्वितं॥
वयमेतत्करिष्यामस्तव कार्यं न संशयः॥ अथ यजमानो ब्रूयात्॥ धन्योहं कृतकृ
त्योहं सौभाग्योहं धरातले। प्रसादाद्भवतां विप्राः पवित्रोहं कृतो धनाः। मेरुमंदरवल्लो
हं न वह्निर्भूतले कृतः। यशो विस्तारितं मेद्य यस्माद्दृष्टिश्च मे कृता। अद्य मे पितरस्तृप्ताः
पवित्रं मे कुलं कृतं। देवतानां प्रसादोपि जातो मेद्यैव निर्मलः। कार्यं कर्त्तुं न मे शक्ति
र्नैव दातुं च दक्षिणाः। न च पूजां विधातुं च नमस्कारं करोम्यहं। शक्त्या सर्वं करिष्या
मि वचनाद्भवतां च नत्। दयाशीर्वादसिंधूनां पूर्णं सर्वं भविष्यति॥ ॥इति प्रकरण

आह्नः समाप्तः॥ ॥ततः स्वस्तिवाचनं कुर्यात्॥ ॥ततः गुरुर्वैष्णवपरिच्छासने उपवि
श्य॥ आचम्य प्राणानायम्य॥ पूजासंकल्पं कृत्वा भूतशुद्धिं कुर्यात्॥ तत्र॥ मूलाधारे
तडित्कोटिसमप्रभां बिसतंतुतनीयसीं सार्द्धत्रिवलयाकारां वर्णमयीं कुंडलिनीं भु
जंगोपमां संचिंत्य प्रणवेन अंकुशमुद्रया उत्थाप्य सुषुम्णामार्गेण ब्रह्मरंध्रं नीत्वा॥ ब्र
ह्मरंध्रस्थ चित्स्वरूपं जीवे नियोजयेत्। तत्र स्मरणं हुंकारं लकारमध्ये प्रविलाप्य। ल
कारं हकारे हकारं सकारे सकारं षकारे इत्यादि विलोममातृकया प्रविलाप्य॥ पंचभू
6 तानि ध्यायेत्॥ पादादि जानुपर्यंतं पृथिवीस्थानं तत्र पार्थिवमंडलं चतुरस्रं अष्टदि
ग्वज्रलांछितं तन्मध्ये लं बीजं पीतवर्णं तेन पंचगुणां पृथिवीं षड्गुणोद्धृतां तद्योगेन
शोषयामि। हुं लं हं फट्॥ जान्वादि नाभिपर्यंतं अपां स्थानं तत्र वारुणमंडलं धनुराकारं
उभयोः कट्योः श्वेतपद्मलांछितं तन्मध्ये वं बीजं शुक्लवर्णं तेन चतुर्गुणा आपः पंचोद्धृ ६
तास्तद्योगेन शोषयामि॥ हुं वं हं फट्॥ नाभ्यादि हृदयपर्यंतं अग्निस्थानं॥ तत्र त्रिको
णं वह्निमंडलं कोणत्रये स्वस्तिकैरलंकृतं तन्मध्ये रं बीजं रक्तवर्णं तेन त्रिगुणं वह्निं चतु

रुद्धा तत्प्रयोगेण शोषयामि॥ यं रं हं फट्॥ हृदयादि भ्रूमध्यपर्यंतं वायुस्थानं तत्र
वर्तुलं वायुमंडलं षड्बिंदुभिर्लांछितं तन्मध्ये यं बीजं धूम्रवर्णं तेन द्विगुणं वायुं
निरुद्धा तत्प्रयोगेण शोषयामि॥ यं यं हं फट्॥ भ्रूमध्यात् ब्रह्मरंध्रपर्यंतं आकाशव
र्तुलं नभोमंडलं श्वेतध्वजलांछितं तन्मध्ये हं बीजं नीलवर्णं तेनैकगुणं नभः निरुद्धा
तत्प्रयोगेण शोषयामि॥ यं हं हं फट्॥ ध्यानं॥ पापपुरुषस्य। ब्रह्महत्याशिरस्कंच
सुवर्णस्तेयभुजद्वयं। सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं। तत्संयोगिपदद्वंद्व
मंगप्रत्यंगपातकं। उपपातकरोमाणि रक्तश्मश्रुविलोचनं। खड्गचर्मधरं कृष्णं कु
क्षौ पापं विचिंतयेत्॥ अंगुष्ठमात्रपुरुषं वामकुक्षौ विचिंतयेत्॥ ततः पापपुरुषदह
नं कुर्यात्। यमिति वायुबीजस्य किष्किंध ऋषिः जगती छंदः। महावायुस्वरूपी देव
ता यं बीजं बिंदुशक्तिः। तेन महाप्रबलयवायुनास्मन्मनोवाक्कायकृतपापपुरुषं शोष
यामि॥ वायुधारणं॥ पूरक १८ कुंभक ३६ रेचक ९ एवं सर्ववारमित्यस्याग्निबीजस्य कश्य
प ऋषिः जातवेदाग्निर्देवता त्रिष्टुप् छंदः। रं बीजं बिंदुशक्तिः। तेन समिद्धमहाप्रबलयाग्निना तं

पापपुरुषं संदहेत्॥ वमित्यमृतबीजस्य हिरण्यगर्भऋषिः गायत्री छंदः परमात्मा
देवता। वं बीजं बिंदुशक्तिः॥ अस्मन्मनोवाक्कायकृतपापपुरुषाधिष्ठितं दग्धशरीर
भस्मप्लावने विनियोगः॥ ब्रह्मरंध्रस्थितं चंद्रमंडलसहस्रदलकमलकर्णिकाम
ध्यवर्त्तितद्बीजस्रवदमृतधारासहस्रैः कलेवरमापूरितं ध्यायेत्॥ लमिति पृथ्वीबी
जस्य वाराहऋषिः गायत्री छंदः पृथ्वी देवता लं बीजं बिंदुशक्तिः॥ तेन बीजेन तद्भस्म
पुंजं कठिनमंडं हिरण्मयं कृत्वा। हमित्याकाशबीजस्य परमेष्ठी प्रजापतिऋषिः
7 गायत्री छंदः आकाशो देवता हं बीजं बिंदुः शक्तिः। तेन बीजेन द्वारविवरं कृत्वांडं प्र
विश्य। ततः द्वादशांते स्थितजीवात्मानं सोहं मंत्रेण स्वहृदयारविंदे समानीय प्रा
णप्रतिष्ठां कुर्यात्॥ अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः शिरसि। ऋग्य
जुः सामाथर्वाणि छंदांसि मुखे। प्राणशक्तिर्देवता हृदि। आं बीजं नाभौ। ह्रीं शक्तिः गुह्ये। क्रों ७
कीलकं पादयोः॥ इति न्यासादि॥ ॐ कं५ आं अंगुष्ठाभ्यां नमः॥ इं चं५ ईं क्रीं तर्जनी
भ्यां नमः॥ उं टं५ ऊं क्रों मध्यमा० एं तं५ ऐं आं अनामि० ओं पं५ औं ह्रीं कनिष्ठि० अं यं१० अः

क्रौं करतलपृ०॥ इति करन्यासः॥ अं कं ध आं आकाशवायुतेजोप्पृथिव्यात्मने
हृद०॥ इं चं ध ईं शब्दस्पर्शरूपरसगंधात्मने शिर० उं टं ध ऊं श्रोत्रत्वक्चक्षुजिह्वा
घ्राणात्मने शिखायै० एं तं ध ऐं वाक्पाणिपादपायूपस्थात्मने कवचाय हुं॥
ओं पं ध औं वचनादानगतिविसर्गानंदात्मने नेत्रत्र० अं यं ए अः मनोबुध्यहं
कारचित्तात्मने अस्त्राय०॥ इति षडंगः॥ १ अं नमः नाभ्यादि पादपर्यंतं न्य
सेत्॥ क्रीं नमः हृदयादि नाभिपर्यंतं। क्रौं नमः मस्तकादि हृदयपर्यंतं॥ यं न
मः ब्रह्मरंध्रे। रं नमः सीमंते। लं नमः॥ ललाटे। वं नमः भ्रूमध्ये। शं नमः कंठकूपे॥
षं नमः हृदये। सं नमः नाभौ। हं नमः॥ लिंगे। क्षं नमः मूलाधारे॥ इति विन्यस्य प्रा
णशक्तिं ध्यायेत्॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं
कोदंडमिक्षूद्भवमथगुणमप्यंकुशं पंचबाणान्। बिभ्राणासृक्कपालं त्रिनयन
विलसत्पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा
नः॥ इति ध्यात्वा हृदि करतलं विधाय॥ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं क्षं सोहं म

मप्राणाः इह प्राणाः॥ आं ह्रीं क्रों यं८ सोऽहं मम जीव इह स्थितः। आं ह्रीं क्रों यं८ सोऽहं मम
सर्वेंद्रियाणि। आं ह्रीं क्रों यं८ सोऽहं मम वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणप्राणा इहैवा
गत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इति त्रिः पठेदिति प्राणप्रतिष्ठा॥ छ॥ ॥ अथ मातृका
न्यासः॥ अस्य श्रीमातृकासरस्वतीमंत्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छंदो मुखे॥
मातृकासरस्वती देवता हृदि। हलः बीजानि नाभौ। स्वराः शक्तयः गुह्ये। व्यक्तयः कील
कं पादयोः॥ नवार्णांगत्वेन न्यासे विनियोगः॥ अं कं ५ आं अंगुष्ठाभ्यां नमः॥ इं चं ५ ईं तर्ज
नी०। उं टं ५ ऊं मध्यमा०। एं तं ५ ऐं अनामि०। ओं पं ५ औं कनिष्ठि०। अं यं ८ अः करतल
पृष्ठा०॥ इति करन्यासः॥ एवमेव षडंगः॥ ततः स्वरैः पूरकं कादिपंचकैः कुंभकं यादि
भी रेचकमिति त्रिः प्राणानायम्य॥ अंतर्मातृकां ध्यायेत्॥ आधारे लिंगनाभौ हृदय ८
सरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के वासांतबा
लमध्ये डफकठसहिते कंठमध्ये स्वराणां हं क्षं तत्त्वार्थयुक्तं सकलदलयुतं वर्णरूपं
नमामि॥ इति ध्यात्वा कंठदेशे विशुद्धे षोडशदलेषु प्रादक्षिण्येन॥ अं नमः। एवं षो

डशस्वरान्विन्यस्य॥ हृदये अनाहते द्वादशदलेषु प्रादक्षिण्येन॥ ॐ कं नमः एवं द्वाद
शदलान्विन्यस्य। नाभौ मणिपूरे दशदलेषु प्रादक्षिण्येन। ॐ डं नमः एवं दशवर्णान्
विन्यस्य। लिंगे स्वाधिष्ठाने षड्दलेषु प्रादक्षिण्येन। ॐ बं नमः एवं षड्वर्णान्विन्य
स्य॥ शिवेन्यां मूलाधारे चतुर्दलेषु प्रादक्षिण्येन। ॐ वं नमः एवं चतुर्वर्णान्विन्यस्य॥
भ्रूमध्ये आज्ञायां द्विदलयोः। ॐ हं नमः दक्षे। ॐ क्षं नमः वामे। ततः ब्रह्मरंध्रे। स
हस्रारे। सहस्रदलकर्णिकायां त्रिकोणं विभाव्य। तिसृषु रेखासु प्रादक्षिण्येन। अं
१५ कं १५ थं १५ हं क्षं मध्ये॥ इति विन्यसेदित्यंतर्मातृकान्यासः॥ ततः बहिर्मातृकां ध्यायेत्॥
पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशि
कलामिंदुकुंदावदातां। अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छा
कल्पामतुच्छस्तनजघनभरां भारतीं त्वां नमामि॥ इति ध्यात्वा॥ अं नमः मूर्ध्नि। आं ललाटे॥
इं ईं नेत्रयोः। उं ऊं कपोलयोः। ऋं ॠं श्रोत्रयोः। ऌं ॡं नासापुटयोः। एं ऐं ओष्ठयोः। ओं औं दशनपं
क्त्योः। अं जिह्वायां। अः तालुस्थाने। कवर्गं दक्षिणहस्तस्य संधौ। तदग्रेषु न्यसेत्। चवर्गं वाम

हस्तसंधौतदग्रेषु।टवर्गंदक्षिणपादसंध्यग्रेषु।तवर्गंवामपादसंध्यग्रेषु।पवर्गंहृदि
विन्यसेत्॥यंनमःत्वचि।रंनमःरक्ते।लंनमःमांसे।वंनमःमेदे।शंनमःअस्थि।षंनमः
मज्जायां।संनमःरसे।हंक्षंनमःशुक्रे॥इति॥अथद्वितीयमातृकान्यासः॥ॐऐंह्रींक्लीं
नमःकनिष्ठिकाभ्यांनमः॥ॐपअनामिकाभ्यांनमः॥ॐपमध्यमाभ्यां०।ॐतर्जनी०॥
ॐपअंगुष्ठाभ्यां०।ॐपकरतलाभ्यां०।ॐपकरपृष्ठाभ्यां०।ॐपदक्षिणकूर्परे।ॐपवाम
कूर्परे।ॐपदक्षमणिबंधे।ॐपहृदयायनमः।उदकोपस्पर्शनं।ॐपशिरसेस्वाहा।ॐप
9 शिखायैवषट्।ॐपकवचायहुं।ॐपनेत्रत्रयायवौषट्।ॐपअस्त्रायफट्॥इतिदि
क्षुदिग्बंधार्थंअस्त्रकरतालिकयाक्षिपेत्॥इति॥तृतीयोमातृकान्यासः॥ह्रींब्रह्मा
णीपूर्वतःपातुइतिपूर्वस्यांपुष्पाणिक्षिपेत्।ह्रींमाहेश्वरीआग्नेय्यांपातु।ह्रींकौमारीदक्षि
णेपातु।ह्रींवैष्णवीनैर्ऋत्यांपातु।ह्रींवाराहीपश्चिमेपातु।ह्रींनारसिंहीवायव्यांपातु।ह्रीं १८
ऐंद्रीउत्तरेपातु।ह्रींचामुंडाईशान्यांपातु।ह्रींव्योमेश्वरीऊर्ध्वंपातु।ह्रींसप्तद्वीपेश्वरिभुवि
पातु।ह्रींनागेश्वरीपातालेपातु॥इति॥अथचतुर्थःषट्देवीन्यासः॥कमलांकुशहस्ता

नंदा पूर्वांगे पातु। खड्गपात्रकरा रक्तदंतिका दक्षिणांगे पातु। पुष्पपल्लवमूलादिह
स्ताशाकंभरी पश्चिमांगे पातु॥ धनुर्बाणधरा दुर्गा वामांगे पातु। शिरःपात्रकरा भी
मा मस्तकाच्चरणपर्यंतं पातु॥ चित्रकांतिश्चित्रभ्रमरपाणिः भ्रामरी चरणान्मस्तकां
तं पातु॥ इति चतुर्थः॥ ह्रीं पादाभ्यां नाभिपर्यंतं ब्रह्मा पातु। नाभ्यादिकंठपर्यंतं जना
र्दनः पातु। कंठाच्छिरःपर्यंतं रुद्रः पातु॥ हंसः पदद्वये पातु। वैनतेयः करद्वयं पातु॥ च
क्षुषी वृषभः पातु॥ सर्वांगानि गजाननः पातु। अंगपरं परा हरिः पातु॥ इति॥ अथ प
ञ्चमो महालक्ष्म्यादिन्यासः॥ अष्टादशभुजा महालक्ष्मी मध्यं पातु। अष्टभुजा सरस्वती ऊ
र्ध्वं पातु। इति ऊर्ध्वांगे॥ विंशद्दोश्चनमंडिता महाकाली अधः पातु। सिंहो हस्तद्वयं पातु।
परमहंसः अक्षिणी पातु। महिषेणसमायुक्तः प्रेतः पादद्वयं पातु॥ सर्वांगानि महेशानि
पातु। चंडिका परापरं अंगं पातु॥ इति षष्ठः॥ अथ सप्तमः॥ ॐ ब्रह्मरंध्रे। ऐं दक्षिणनेत्रे।
ह्रीं वामनेत्रे। क्लीं दक्षिणकर्णे। चा वामकर्णे। मुं दक्षिणनासापुटे। डा वामनासापुटे। यै
मुखे। वि लिंगे। च्चे गुदे॥ इति॥ अथाष्टमः॥ ॐ गुदे। ऐं लिंगे। ह्रीं मुखे। क्लीं वामनासापु

दे। चां दक्षिणनासापुटे॥ मुं वामकर्णे। डां दक्षिणकर्णे। यैं वामनेत्रे। विं दक्षिणनेत्रे। च्चें ब्र
ह्मरंध्रे॥ अथ नवमः॥ नवाक्षरमंत्रं मस्तकाच्चरणावधि पूर्वांगे न्यसेत्॥ ततस्तं मंत्रं
दक्षपार्श्वे। ततस्तं मंत्रं पृष्ठे। ततस्तं मंत्रं वामपार्श्वे। तमेव मंत्रं वामपार्श्वे। तमेव पृष्ठे।
तमेव दक्षपार्श्वे। तमेव चरणान्मस्तकावधि॥ इति॥ अथ दशमः॥ मूलं हृदयाय नमः॥
ॐ उदको॰ मूलं शिरसे स्वाहा। मूलं शिखायै वषट्। मूलं कवचाय हुं। मूलं नेत्रत्रया
य वौषट्। मूलं अस्त्राय फट्॥ इति दशमः॥ अथ एकादशमः॥ खड्गिनी शूलिनी घो
रे ति श्लोकेन शीर्षतः पूर्वांगे। अनेन हृत्स्थलतः॥ शूलेन पाहि नो देवी त्यनेन श्लोकच
10 तुष्टयेन दक्षिणांगे इति बालार्कसदृशां सर्वस्वरूपे सर्वेशे इति पंचश्लोकैः वामांगे॥
इति शुद्धस्फटिकसंकाशं॥ इति एकादशो न्यासः॥ अनेन प्रकारेणैकादश न्यासा १०
न्विधाय। गुरुर्वेद्युपरि। ईशानकोणे कलशं संस्थाप्य। तत्र देवीमावाह्य पंचोपचा
रैर्नवाक्षरेण मंत्रेण संपूज्य। मध्यवेद्युपरि विरचिते सर्वतोभद्रमंडले मध्ये स्थापि
तां स्वर्णनिर्मितामष्टादशभुजां देवीं अग्न्युत्तारणपूर्वकं प्रतिष्ठाप्य॥ आवाहनादि

षोडशाद्भिर्मंत्रैरुपचारैर्नवाक्षरेण मंत्रेण संपूज्य। जापका अप्यस्मिन् समये मा
तृकादिन्यासपूर्वकं यजमानगतं फलं संकल्प्य चंडीपाठमारभेत्। सप्तशतीजापका
अपि एतान्न्यासान् कुर्युः॥ तदुक्तं सप्तशतीकल्पे। एतन्न्यासानकर्त्तव्यश्चंडीसप्तशतीं
जपेत्॥ एवं न्यासविधिं कृत्वा मुद्रां विलोकयेत्। तस्यावलोकनेराजन् कृतो
न्यासस्थिरो भवेदिति॥ इत्थमेकादशन्यासान् कृत्वा नवाक्षरमंत्रस्य षडंगानि न्यसे
त्॥ अस्य श्रीनवार्णवमंत्रस्य हिरण्यगर्भविष्णुरुद्रा ऋषयः महाकाली महालक्ष्मीम
हासरस्वत्यो देवताः। गायत्र्युष्णिगनुष्टुप्छंदांसि। नंदाशाकंभरीभीमाशक्तयः प
परमशिवलिंगरक्तदंतिकादुर्गाभ्रामरीबीजानि। अग्निवायुसूर्यास्तत्वानीति संस्मृत्य।
नवाक्षरमंत्रस्य षडंगानि न्यसेत्॥ मूलं अंगुष्ठाभ्यां नमः। मूलं तर्जनीभ्यां नमः। मूलं
मध्यमाभ्यां नमः। मूलं अनामिकाभ्यां नमः। मूलं कनिष्ठिकाभ्यां०। मूलं करतलपृ
ष्ठाभ्यां नमः। मूलं हृदयाय नमः। उदकोप०। मूलं शिरसे स्वाहा। मूलं शिखायै वषट्। मू
लं कवचाय हुं। मूलं नेत्रत्रयाय वौषट्। मूलं अस्त्राय फट्। ततः षट्कोणमध्ये स्वां म

ध्यबीजे यथावस्थितां । महाकाल्यामर्चस्वस्थानं कृतां दक्षिणेतरे । संयुक्तां दक्षिणे वामे
सिंहेन महिषेण च । अष्टादशभुजां ध्यात्वा महालक्ष्मीं प्रणम्य च । पीठादि पूजनं कु
र्यात् स्वबीजेन पृथक् पृथक् ॥ ॐकारं बिन्दुमध्यस्थं नामधेयाद्यमक्षरं । देवतानां
स्वबीजं तत् पूजायै ऋद्धिसिद्धिदं ॥ तेन स्वस्वबीजेन पीठदेवताश्चावरदेवताश्च पू
जयेदिति सिद्धं । पूर्वोक्तप्रकारेण देवीं ध्यात्वा ताम्रभाजने षट्कोणं चक्रं गंधादिना
आलिख्य तदुपरि वृत्तमालिख्य तदुपर्यष्टौ दलानि चालिख्य मध्ये त्रिकोणमा
लिख्य तत्र क्रमेण ऐं ह्रीं क्लीं बीजानि चालिख्य । षट्कोणेषु षट् बीजानि चालिख्य ॥
आद्ये बीजे महाकालीं । मध्यबीजे महालक्ष्मीं । तृतीयबीजे सरस्वतीं ॥ स्थितां ध्या
त्वा पूजामारभेत । ततोऽर्घ्यपात्रं शुद्धवारिणा आपूर्य गंधपुष्पाक्षतांस्तत्र विन्यस्य
सर्वाणि तीर्थानि तत्रावाह्य मत्स्यमुद्रया आच्छाद्य मूलेनाभिमंत्र्यास्त्रेणोद्दि ११
च संरक्ष्य अवगुंठनमुद्रयावगुंठ्य तज्जलेन पूजोपहारान् आत्मानं संप्रोक्ष्य देह
मध्ये पीठे स्थितां देवीं मानसैरुपचारैः संपूज्य । बाह्यपूजार्थं पूर्ववत् षट्कोणपीठपूजां

कुर्यात्॥ तत्र ओंकारपीठाय नमः॥ पूर्णपीठाय नमः॥ कामपीठाय नम इति पीठत्र
यं पूजयेत्॥ संप्रदायात्॥ ततः पीठस्य पूर्वादिदिक्षु गणेशाय नमः॥ क्षेत्रपालाय
नमः॥ पादुकाभ्यां नमः॥ बटुकेभ्यो नमः इति चतुर्दिक्षु॥ आग्नेय्यादिचतुर्दिक्षु पूजा प्राद
क्षिण्येन जयायै नमः॥ विजयायै नमः॥ जयंत्यै॰॥ अपराजितायै नम इति सर्वत्र संपूज्य॥
ततः पूर्वस्यां ईशानकोणात् आग्नेयकोणपर्यंतं प्रादक्षिण्येन॥ विष्णुमायायै नमः॥ चेतना
यै॰ बुध्यै॰ निद्रायै॰ क्षुधायै॰ पंचशक्तीः पूजयेत्॥ ततो दक्षिणत आग्नेयकोणान्नैर्ऋति
कोणपर्यंतं॥ छायायै नमः॥ शक्त्यै॰ तृष्णायै॰ क्षांत्यै॰ जात्यै॰ लज्जायै॰ षट् शक्तीः पूजयेत्॥
ततो नैर्ऋतिकोणात् दारभ्य वायुकोणपर्यंतं॥ शांत्यै नमः॥ श्रद्धायै॰ कीर्त्यैन॰ लक्ष्म्यै॰ धृत्यै॰
वृत्त्यै॰ षट् शक्तीः पूजयेत्॥ ततो वायु कोणमारभ्य ईशानकोणपर्यंतं स्मृत्यै॰ दयायै॰ तु
ष्ट्यै॰ पुष्ट्यै॰ मात्रे॰ भ्रांत्यै॰ षट् शक्तीः पूजयेत्॥ एवं पीठं संपूज्य तदुपरि पद्मनालस्य मूले आ
धारशक्त्यै॰ कूर्मशक्त्यै॰ शेषशक्त्यै॰ पृथिवीशक्त्यै॰ इति पूजयेत्॥ पद्माय नम इति पद्मं
संपूजयेत्॥ ततः तत्र पद्मे वह्न्यर्कसोमानां मंडलत्रयं पूजयेत्॥ ततः पूर्वपत्रादितः

ईशपर्यंतं अष्टसुपत्रेषु। ब्रह्माण्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० नारसिं
ह्यै० ऐंद्री० चामुंडायै० अष्टौ शक्तीरर्चयेत्। कर्णिकायां ब्रह्माणीं अर्चयेत्। ततः षट्
सु कोणेषु पूर्वकोणतः प्रादक्षिण्येन। नंदजायै० रक्तदंतिकायै० शाकंभर्यै० दुर्गा
यै० भीमायै० भ्रामर्यै० नम इति सर्वत्र पूजयेत्॥ मध्ये पूज्य देवी दक्षिणभागे सिंहं
वामभागे महिषं पूजयेत्॥ पीठादि पूजनं कुर्यात् स्वबीजेन पृथक् पृथक् इति व
चनात्। महालक्ष्मी नामधेयाद्याक्षरेण॥ ॐ मं इत्येवं रूपेण महालक्ष्म्याः पीठं पू
12 जयेत्। ततः सुवर्णनिर्मितमहालक्ष्मीप्रतिमायाः अग्न्युत्तारणं विधाय। तस्याः
हृदयादिन्यासं विधाय प्राणप्रतिष्ठां च कृत्वा आवाहनादि पूजां कुर्यात्॥ तत्र प्र
थमं दुर्गायाः स्वर्णमूर्तिस्थितायाः ध्यानं। महिषघ्नीं महादेवीं कुमारीं सिंहवाहि १२
नीं। दानवांस्तर्जयंतीं च सर्वकामदुघां शिवां। ध्यायामि मनसा दुर्गां नाभिमध्ये
व्यवस्थितां। आवाहयेत्ततो दुर्गां संसारभयनाशिनीं॥ इति ध्यानं विधाय। क
ल्याणजननीं सत्यां कामदां करुणाकरां। अनंतशक्तिसंपन्नां दुर्गामावा

हृद्यामयहं ॥ महालक्ष्म्यै आवाहनं समर्पयामि ॥ दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदे शिवे ॥
आसनं मणिमुक्ताढ्यं गृहाण त्वं सुरेश्वरि ॥ इत्यासनं । कात्यायनी महादुर्गे चामुंडे शंक
रप्रिये । पाद्यं गृहाण देवेशि नंदकालि नमोस्तु ते इति पाद्यं । जगत्पूज्ये त्रिलोकेशी सर्वदान
वभंजनि । अष्टांगार्घ्यं गृहाण त्वं देवि विश्वार्त्तिहारिणि ॥ इत्यर्घः । सर्वलोकस्य याश
क्तिर्ब्रह्मविष्ण्वादिनिस्कृता ॥ ददाम्याचमनं तस्यै महालक्ष्म्यै मनोहरं । आच
मनं । ज्ञानमूर्त्ते नंदकालि दिव्यमूर्त्ते सुरेश्वरि । स्नानं गृहाण देवेशि नारायणि
नमोस्तु ते ॥ इत्यनेन मंत्रेण पंचामृतैर्जलैः स्नपयेत् । स्नानांते आचमनं ॥ पट्ट
सूत्रविचित्राढ्यं नानावर्णैः सुराजितं । वस्त्रं गृहाण देवेशि सुप्रीता वरदा मम ।
इति वस्त्रं । वस्त्रांते आचमनं ॥ सुरासुरशिरोरत्ननीराजितपदद्वये । अलं
कारान्गृहाण त्वं नानारत्नसमन्वितान् ॥ इत्याभरणानि । श्रीखंडागरुक
र्पूरैर्युक्तं श्रीचंदनं सत्त्ववां गृहाण हे गंधं देवेशि नंदकालि नमोस्तु ते । इति गंधं
कुसुमेन समायुक्तैश्चंदनेन विलेपितैः । बिल्वपत्रैस्तथा वासे दुर्गे हिं त्वारणे
गतः । इत्यक्षतान् । नानापुष्पविचित्राढ्यां पुष्पमालां सुशोभनां । प्रयच्छा

मि सुरेशानि सुप्रीता वरदा भव ॥ इति पुष्पं ॥ गुग्गुलं घृतसंयुक्तं नानागंधसुसंयुतं ॥
धूपं गृहाण चामुंडे भद्रकालि नमोस्तु ते ॥ इति धूपं ॥ पट्टसूत्रोज्ज्वलद्वर्ति गोघृते
न समन्वितान् ॥ दीपान् गृहाण देवेशि नारायणि नमोस्तु ते ॥ इति दीपं ॥ दिव्यान्नं गो
घृतोपेतं नानाभक्ष्यैः समन्वितं ॥ मया निवेदितं तुभ्यं नारायणि नमोस्तु ते ॥ इति नै
वेद्यं ॥ नैवेद्यांते आचमनं ॥ गृहाण देवि तांबूलं कर्पूरेण सुसंयुतं ॥ मया निवेदितं तु
भ्यं नारायणि नमोस्तु ते ॥ इति तांबूलं ॥ नालिकेरं गृहीत्वा ॥ जयंती मंगला काली भ
द्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ इत्यर्घ्यं ॥ दुर्गा
13 कात्यायनी चंडी महिषासुरमर्दिनी ॥ दीपमालां प्रयच्छामि सुप्रीता वरदा भव ॥
॥ इति नीराजनं ॥ प्रथमे दिवसे दश दीपाः ॥ द्वितीये दिवसे २० तृतीये ३० चतुर्थे ४० एवं श
त दीपाः ॥ चतुर्थ दिनपर्यंतं दिनवृध्या दीपवृद्धिः ॥ दुर्गे देवि नमस्तुभ्यं नमस्त्रैलोक्यपूजि
ते ॥ पुष्पांजलिं मया दत्तं गृहाण सुरेश्वरि ॥ इति पुष्पांजलिं ॥ सर्वस्वरूपे सर्वेशे सर्वशक्ति १३
समन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ सर्वमंगलमांग० नमोस्तु ते ॥ इति
प्रार्थनां नमस्कारः ॥ अंजलिं बध्वा ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ यशो देहि ध

तं देहि सर्वान् कामांश्च देहि मे ॥ इति प्रार्थयेत् ॥ ततः मया जन्मसहस्रेषु अर्चितं पाप
संशयं । तत्सर्वं नाशयेत्क्षिप्रं प्रदक्षिणं पदे पदे ॥ इति प्रदक्षिणा ॥ ततः पूजासमृध्य
र्थं दक्षिणा संकल्पः ॥ पूजायाः सद्गुणार्थं तु दक्षिणा दीयते मया । तां गृहाण महेशानि
पूजां मे सफलं कुरु ॥ इति षोडशोपचारः ॥ ततः चतुरस्रे पूर्वाद्यष्टदिक्षु क्रमेण पूजये
५ त् । पूर्वे । उड्यांणपीठाय नमः ॥ उड्याणेश्वराय नमः ॥ उड्याणांबापादुकाभ्यां० नमः ॥ आग्ने
ये मातृकापीठा० मातृकेश्व० मातृकांबापा० ततः दक्षिणे जालंधरपीठा० जालंधरेश्वरा० ॥ २
जालंधरांबापा० ॥ ततः नैर्ऋत्यां कोल्लापुरपीठाय० । कोलारे० ॥ कोलरांबा० ततः प
श्चिमे । पूर्णगिरिपीठाय० पूर्णेश्वराय० पूर्णांबा० ततः वायव्यां चौहारपीठा० चौहारेश्वराय०
सौहारांबा० ततः उत्तरे । लंकागिरिपीठाय० लंकेश्वराय० लंकांबापा० ईशाने कामरू
पीठाय० कामेश्वराय० कामांबा० तत्रैवाष्टदिक्षु पूर्वादिक्रमेण अष्टासिद्धांतपूजयेत् ।
गोरक्षनाथाय नमः ॥ अलक्षनाथन० आदिना० अनघना० बालना० सत्यना० डे
मनाथाय० ततश्चतुरस्रे चतुःकोणेषु वेतालचतुष्टयं पूजयेत् । आग्नेये अग्निमु
खाय० नैर्ऋत्यां डेनवादनाय० वायव्यां ज्वालामुखाय० ईशान्यां धूम्रवेतालाय०

ततश्चाष्टदले पूर्वादिक्रमेण मातृकाष्टकं पूजयेत्॥ ॐ ब्रह्माण्यै नमः॥ ॐ माहेश्वर्यै॰॥
कौमार्यै॰। वैष्णव्यै॰। वाराह्यै॰। नारसिंह्यै॰। माहेन्द्र्यै॰। चंडिकायै॰। तत्रैव भैरवाष्टकं॥
असितांगभैरवाय नमः॥ रुद्रभैरवाय॰। चंडभैरवाय॰। क्रोधभैरवाय॰। उन्मत्तभै-
रवाय॰। कपालभैरवाय॰। भीषणभैरवाय॰। संहारभैरवाय॰॥ तत्रैव अष्टदिक्-
पालान् पूजयेत्॥ इंद्राय नमः॥ अग्नये॰। यमाय॰। नैर्ऋतये॰। वरुणाय॰। वायवे॰॥
सोमाय॰। ततः षट्कोणे षट्दलेषु। पूर्वादिक्रमेण॥ गुरवे नमः॥ परमगुरवे॰। परमेष्ठि-
गुरवे॰। विनायकाय॰। हरये॰। हराय॰। ततस्त्रिकोणे महाकाल्याः पृष्ठतः॥ रुद्राय न-
मः॥ गौर्यै॰। महालक्ष्म्याः पृष्ठतः॥ विष्णवे नमः॥ लक्ष्म्यै॰। महासरस्वत्याः पृष्ठतः॥ ब्रह्म-
णे नमः॥ स्वरायै॰। ततस्त्रिकोणाद्बहिः। दक्षिणे कालाय नमः॥ वामे मृत्यवे नमः॥ त-
14 तस्त्रिकोणाधोभागे दक्षिणे सिंहाय नमः॥ वामे महिषाय॰॥ पुनस्त्रिकोणमध्ये
मिथुनत्रयस्य पृष्ठे रुद्राय नमः॥ गणपतये॰। पुनस्त्रिकोणाद्बहिः उपरिभा- १४
गे आधाराय नमः॥ वामे कूर्माय नमः॥ दक्षिणे अनंताय॰। ततः महालक्ष्म्यां-
गपूजा। मध्ये ॐ चपलायै नमः॥ पादौ पूजयामि। ॐ चंचलायै नमः॥ जानु पू-

जघामि। कमलायै०। कटिं०। कात्यायन्यै०। नाभिं०। जगन्मात्रे०। जठरं०। विष्णुवल्ल
भायै०। वक्षस्थलं०। कमलवासिन्यै०। भुजद्वयं०। पद्मकलायै०। हस्तद्वयं०। कंबुकंठि
न्यै०। कंठं०। सुस्मितायै। मुखं०। कमलपत्राक्ष्यै०। नेत्रत्रयं०। श्रियै०। शिरः०। ततः
पीठाद्बहिः अष्टदिक्षु क्रमेण चतुःषष्टियोगिनीः पूजयेत्। श्वेतवर्णास्त्रिशूलडं
मरुपाशांकुशधराः पूर्वे। जयायै०। गणेश्वर्यै०। विजयायै०। सिद्धयोगिन्यै०। जयं
त्यै०। महामायै०। अपराजितायै०। दिव्ययोगिन्यै० ८ गौरवर्णा अक्षमालांकुशसु
वर्णकुम्भकराः। आग्नेये। श्वेतायै नमः। डाकिन्यै०। काल्यै०। कालरात्र्यै०। जं
कार्यै०। रौद्र्यै०। वेताल्यै०। जंकार्यै० ८। रक्तवर्णा ज्वालात्रिशूलाभयवरकराः।
दक्षिणे। ऊर्ध्वकेशिन्यै०। विरूपाक्ष्यै०। शुष्कांगिन्यै०। नरभोजनायै०। फेत्कारि
कायै०। भद्रायै०। धूम्रांगायै०। कलहप्रियायै० ८। विद्रुमवर्णा ध्वजबाणधनुः
पाशहस्ताः। नैर्ऋत्यां। घोरायै०। रक्ताक्ष्यै०। विश्वरूपायै०। भयंकर्यै०। वीरायै०।
कुमारिकायै०। वाराह्यै०। मुंडधारिण्यै० ८। रक्तोत्पलवर्णाः कमलाक्षमालाभ
यवरकराः पश्चिमे। भैरवायै०। द्राविण्यै०। धूम्राक्ष्यै०। प्रेतभोजनायै०। खड्गां

धारिण्यै० । दीर्घायै० । मालिन्यै० । मंत्रयोगिन्यै० ८ । धूम्रवर्णाः शंखचक्रगदापद्मधराः । वायव्यां ॥
काल्यै नमः । चक्रिण्यै नमः । कंकाल्यै० । भुवनेश्वर्यै० । कोटक्यै० । महामायै० । यमदूत्यै० । क
पालिन्यै० ८ ॥ अंजनवर्णाः खड्गखेटकपरशुपाशहस्ता उत्तरे ॥ केशिन्यै नमः । मक्षिन्यै० । रो
मजंघायै० । श्वेतचारिण्यै० । विशालायै० । कार्मुक्यै० । लोल्यै० । अधोमुख्यै० ८ । धूम्रवर्णाः कुं
तखेटकपरिघभिंडिमालधराः । ईशाने । मुंडाग्रधारिण्यै नमः । व्याघ्र्यै० । रोहिण्यै० । प्रेतभू
षण्यै नमः । धुर्जटिन्यै० । मायै० । कालिकायै० । विश्वलंबिन्यै० ८ ॥ इति चतुःषष्टियोगिनीपू
जा ॥ अथ चतुःषष्टिभैरवपूजा ॥ तत्रैव । अष्टाष्टगुणिताश्चैव भैरवाणां महागणाः ॥ स्वर्ग
15 पातालमर्त्येषु विचरंति महाबलाः ॥ योगिनीनां गणैः सार्द्धं पूजयेद्भैरवं गणं । योगिनीनां
यथाध्यानं तथा तेषां भवेन्नृप ॥ पूर्वे । शंभवे० । नीलकंठाय० । विशालाक्षाय० । मार्तंडा
य नमः । मनुप्रनाय० । स्वच्छंदाय० । असिताय० । कृष्णाय० ८ ॥ आग्नेये । खेचराय० ॥
संचराय० । विरूपाय० । विरूपाक्षाय० । नानारूपधराय० । पराय० । कुंदवर्णाय० ॥ १५
सुधागात्राय० । दक्षिणे । उन्मत्तभैरवाय० । मेघनादाय० । मनोवेगाय० । क्षेत्रपाला
य० । विषापहाय० । निर्भयाय० । वेगिताय० । प्रेताय० ८ । नैर्ऋत्ये । लोकपालनभैरवा

यं० गदाधराय० वज्रहस्ताय० महाकालाय० प्रचंडाय० प्रजयाय० अंतकाय० त्रा
मकाय० ८ पश्चिमे। भीषणाय नमः। संहाराय० कुलपालाय० चंडपालाय० प्रजापाला
य० रक्तांगाय० वेगवीक्षणाय० अरूपाय० ८॥ वायव्यां। धरापालाय नमः। कुंडलिने०॥
मंत्रनायकाय० रुद्रपितामहाय० विष्णवे० बटुकनाथाय० भूतनाथाय० वेतालाय०
८॥ उत्तरे त्रिनेत्राय० त्रिपुरांतकाय० वरदाय० पर्वतवासाय० शशिशकलभूषणाय०
सर्वज्ञाय० सर्वदेवमयाय० ईशानाय० ८॥ ईशान्यां। सर्वभूतहृदिस्थाय० घोरसायकाय०
भयंकराय० भुक्तिमुक्तिप्रदाय० कालाग्नये०। महारौद्राय० भयानकाय० दक्षिणाभि
मुखस्थिताय० ८॥ इति चतुःषष्टिभैरवपूजा॥ ॥इति पूजासमाप्ताः॥ ॥अथवा शारदा
तिलके अन्यानि सप्तावरणानि स्फुः॥ तद्यथा॥ षट्सु कोणेषु पूर्वत आरभ्य ईशानकोण
पर्यंतं मंगैः प्रथमावरणं॥ ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे० ॐ ह्रूं शिखायै० ह्रैं कवचाय०
ह्रौं नेत्रत्रयाय० ह्रः अस्त्राय फट् इति॥ ततो द्वितीयावरणं॥ पूर्वपत्रकेसरयोः अका
राय नमः॥ आकारा० आग्नेयपत्रकेसरयोः॥ इकाराय० ईकारा० दक्षिणपत्रकेसर
योः॥ उकारा० ऊकाराय०॥ नैर्ऋतिपत्रकेसरयोः॥ ऋ ॠकारा० लृकाराय० पश्चिम

पत्रकेसरयोः। ऌकाराय। ॡकाराय। वायुपत्रकेसरयोः। एकाराय। ऐकाराय॥
उत्तरपत्रकेसरयोः। ओकाराय। औकाराय। ईशपत्रकेसरयोः। अनुस्वाराय नमः॥
विसर्गाय नमः॥ इति तृतीयावरणं॥ पूर्वपत्रे कादिवर्गाय नमः। आग्नेयपत्रे चादिवर्गा-
य। दक्षिणपत्रे टादिवर्गाय। नैर्ऋतिपत्रे तादिवर्गाय। पश्चिमपत्रे पादिवर्गाय। वा-
युपत्रे यादिवर्गाय॥ उत्तरपत्रे शादिवर्गाय॥ इति तृतीयावरणं॥ ततः पूर्वादिष्वष्ट-
पत्रेग्रेषु व्यापिनी पालिनी पाविनी क्लेदिनी धरिणी मालिनी हंसिनी शांतिनी इत्ये-
ता अष्टौ शक्तीः पूजयेत्॥ इति चतुर्थमावरणं॥ ततस्तदुपरि पूर्वादिक्रमेण ब्राह्मी मा-
हेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा महालक्ष्मीरित्यष्टौ विश्वमातॄः पूजयेत्
॥ इति पंचमावरणं॥ तत इंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानानंतब्रह्मणो द-
शदिदशदिक्पालान् पूजयेत्॥ इति षष्ठमावरणं॥ ततो वज्रशक्तिदंडखड्गपाशध्वज-
गदात्रिशूलचक्रांबुजानि दिकपालास्त्राणि॥ पूजयेत्॥ इति सप्तमावरणं॥ ततः पुष्पां १६
जलित्रयं दत्वा प्रथमदिने दशकुमारीभोजनसंकल्पः॥ दशविप्रभोजनसंकल्पं कु-
र्यात्॥ द्वितीयदिने विंशतिकुमारीविंशतिविप्रान्॥ तृतीये त्रिंशत्कुमारीत्रिंशद्विप्रान्॥

चतुर्थे चत्वारिंशत्कुमारी चत्वारिंशद्विप्रान्॥ द्विगुणैश्चंदनपुष्पादिभिश्च पूजा॥ अस्य कृतस्य चंडिकापूजनकर्मणो यं॰ चंडिकाप्रसादात्॥ सर्वं परिपूर्णमस्तु॥ अस्य स्तु॰ नमः॥ प्रसादात्कुर्वतां कर्म॰॥ आवाहनं न जा॰ इति प्रार्थयेत्॥ ॥इति दुर्गापूजा समाप्ताः॥ प्रथमे दिवसे दश विप्राणां एकैकं चंडीपाठं कुर्युः॥ द्वितीये द्वौ द्वौ॥ तृतीये त्रय चतुर्थे चत्वार एवं दिनवृध्या चंडीपाठवृद्धिः॥ एतानि सप्तावरणानि लिखितानि शारदातिलकात्॥ तथा हि॥ अंगैरावरणं पूर्वं द्वितीयं युग्मशः स्वरैः अष्टवर्गैस्तृतीयं स्यात्तल्लक्ष्मिभिरनंतरं॥ पंचमं मातृभिः प्रोक्तं षष्ठं लोकेश्वरैः स्मृतं। लोकपालायुधैः प्रोक्तं व ज्राद्यैः सप्तमं तथा। व्यापिनी मालिनी पश्चात्प्लाविनी क्लेदिनी तथा। धारिणी मालिनी नू योद्हसिनी शंखिनी तथा॥ एताः पत्रेषु संपूज्या धृताः करुणपुस्तकाः॥ ब्राह्मी माहेश्वरी नू यः कौमारी वैष्णवी तथा॥ नारायणनंतरे द्राणी चामुंडा सप्तमं ततः॥ अष्टमी स्यान्महा लक्ष्मी प्रोक्ताः स्युर्विश्वदुर्गा इति॥ इति चतुर्थदिनपर्यंतं कृत्यं॥ पंचमे दिवसे प्रातर्होमं कुर्याद्विधानतः॥ इति देवीचरित्ररुद्रयामलीयवचनात्पंचमेह्नि प्रातर्होमः मारभेत्॥ ॥छ॥ ॥अथ पंचमेह्नि होमविधिः॥ ॥दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः

श्रियं ॥ सर्वलोकप्रणेत्रीं च प्रणमामि सदाशिवां ॥१॥ मंगलां शोभनां शुद्धां निष्कलां परमां
कलां ॥ विश्वेश्वरीं विश्वपूज्यां चंडिकां प्रणमाम्यहं ॥२॥ सर्वदेवमयीं देवीं सर्वरोग
भयापहां ॥ ब्रह्मेशविष्णुनमितां प्रणमामि सदाशिवां ॥३॥ विंध्यस्थां विंध्यनिल
यां दिव्यस्थाननिवासिनीं ॥ योगिनीं योगजननीं चंडिकां प्र० ॥४॥ ईशानमातरं
देवीमीश्वरीमीश्वरप्रियां ॥ प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीं ॥५॥ य
इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः ॥ स मुक्तः सर्वपापैस्तु दुर्गया सह मोदते ॥
॥६॥ ॥ इति नमस्कारः ॥ ॥ छ ॥ इति शतचंडीविधानपूजापद्धतिः समाप्ता ॥
॥ ॥ ॥ ध्वजो वज्रं तथा पद्मं अंकुशो यव एव च । स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं च तथैव
हि ॥१॥ इति दक्षिणचर्ण ॥ इंद्रचापं त्रिकोणं च कलशं चार्द्धचंद्रकं ॥ अंबरं मत्स्यचिह्नं च
गोःपदं सप्तमं स्मृतं ॥२॥ जंबूफलसमाकारं षोडशं पद्मकं तथा । षोडशैव तु चिह्नानि म १७
याद्दृष्टानि तत्पदे ॥३॥ ॥ इति वामचर्ण ॥ ॥ इति ब्रह्माण्डपुराणोक्तम् ॥ ॥ संवत् १७
॥५३ वर्षे वैशाख बदि १० शुक्रे लेखः ॥ ॥ द्विवेदि नवानीशंकरात्मज देवशर्मेण लिखितं ॥